# नायं छागः

## ( प्रहसनम् )

**( ततः प्रविशति स्कन्धे छागं वहन् देवदत्तः )**

**देवदत्तः** – अहो ! स्वस्थः शोभनोऽयं छागः । ग्रामं नीत्वा सपरिवारोऽहं दिनत्रयं यावद् एतस्य सुललितं मांसं भक्षयामि । (इत्येकतो निष्क्रान्तः) (ततः एकस्मिन् कोणे स्थितास्त्रयो धूर्ता एतद् दृष्ट्वा परस्परं मन्त्रयन्ति ।)

**प्रथमः** – (मन्दस्वरेण) मित्र । चिरात् छागमांसं न प्राप्तम् । अद्यायं वराको दृश्यते । एतस्माच्छागग्रहणाय कश्चिद् उपायः करणीयः ।

**द्वितीयः** – उपायः परमः सरलोऽस्ति ।

**तृतीयः** – कीदृशः ? कीदृशः ?

**द्वितीयः** – (उभयोःकर्णे किमपि कथयति ।)

**प्रथमः** – (विहसन्) युवाम् अग्रे वेगेन गच्छतम् । अहमत्र तेन सह आलपामि ।

(द्वितीयतृतीयौ गच्छतः)

(ततः प्रविशति स्कन्धे छागं वहन् देवदत्तः)

**देवदत्तः** – (छागं प्रति) अयि भोः ! अधुना त्वं मम स्कन्धे तिष्ठसि, श्वः मम उदरे स्थास्यसि ।

**प्रथमः** – भो ब्राह्मण ! धिक् त्वाम् । कथं कुक्कुरमेनं स्कन्धे वहसि ?

**देवदत्तः** – (तं साशंकं पश्यन्) नायं कुक्कुरः, छागोऽयं छागः ।

**प्रथमः** – (विहसन्) पश्यन्तु भोः ! अयं मूर्खः कुक्कुरमेव छागं मनुते ।

**देवदत्तः** – त्वमेव मूर्खोऽसि । अयं मे छागोऽस्ति ।

**प्रथमः** – गच्छ मूर्ख ! कुक्कुरमेव खादिष्यसि, चाण्डालो भविष्यसि । सावधानेन पश्य, कुक्कुरोऽयमिति ।

**देवदत्तः** – गच्छ, गच्छ । मां वञ्चयसि । नाहं तव शृणोमि ।

(उभौ निष्क्रान्तौ)

(ततः प्रविशति द्वितीयः)

**द्वितीयः** – (आगच्छन्तं देवदत्तं विलोक्य साश्चर्यं विलोकयन्) पश्चन्तु भोः ! अयं ब्राह्मणः कुक्कुरं वहति । भोः ? निक्षिप एनम् । धिक् त्वाम् ।

**देवदत्तः** – नायं कुक्कुरः, छागोऽयम् ।

**द्वितीयः** – तव दृष्टिदोषोऽयम् यत् कुक्कुरं छागं भणसि ।

**देवदत्तः** – (स्वगतम्) अहो पूर्वमपि तेनोक्तम्, अधुना पुनरप्ययं कथयति । पश्यामि तावत् । (छागं स्कन्धादवतार्य निपुणं निरीक्ष्य) नहि-नहि । नायं कुक्कुरः, छाग एवायम् ।

**द्वितीयः** – धिग् धिक् ! परित्यज कुक्कुरम् ।

**देवदत्तः** – अरे मूर्ख ! किं प्रलपसि ? नायं कुक्कुरः छागोऽयं मे छागः । छागं स्कन्धे नीत्वा अग्रे सरति ।

**द्वितीयः** – गच्छ, गच्छ । कुक्कुरं खादिष्यसि ।

(इति निष्कान्तः)

(देवदत्तः किञ्चिद् दूरं गच्छति । ततः प्रविशति तृतीयः)

**तृतीयः** – (उच्चैर्विहसन्) पश्यन्तु भोः । ब्राह्मणोऽयं कुक्कुरं नयति ।

**देवदत्तः** – नायं कुक्कुरः, छागोऽयम् ।

©BSTBPC
NOT TO BE REPUBLISHED

**तृतीयः** – अरे मूर्ख ! केनापि वञ्चितोऽसि । कुक्कुरोऽयं, परित्यज एनम् । तव पितुः शपथं कृत्वा कथयामि, नायं छागः, कुक्कुरोऽयम् ।

**देवदत्तः** – (विस्मितः सन् स्वगतम्) हन्त ! सर्वे कथयन्ति कुक्कुरोऽयमिति । सत्यम्, ममैव मतिभ्रमोऽस्ति ।

**तृतीयः** – भो ब्राह्मण ! किं विचारयसि ? शीघ्रं परित्यज एनम् । नद्यां स्नात्वा गंगाजलेन शरीरं शोधय ।

**देवदत्तः** – सत्यम् भ्रातः । मम मतिभ्रमो जातः परित्यजामि एनम् । (इति छागं परित्यज्य घृणापूर्वकं निष्क्रान्तः ।)

(ततः प्रथमः द्वितीयश्च प्रविशतः)

**तृतीयः** – (सानन्दं छागं गृहीत्वा) सुदिनमद्य । शोभनोऽयं छागो लब्धः ।

**प्रथमः** – अस्माकं मन्त्रणा सफला जाता ।

**द्वितीयः** – तत्र कः सन्देहः, क्षिप्रं निस्सरामः ।

(इति निष्क्रान्ताःसर्वे)